

# सप्तमः पाठः

# समुद्रतटः

**तृतीया-चतुर्थी-विभक्तिः**



एषः समुद्रतटः अस्ति। प्रणवः अत्र मित्रैः सह क्रीडति। सः बालुकाभिः गृहं रचयति। बालकाः कन्दुकेन क्रीडन्ति। ते पादेन कन्दुकं क्षिपन्ति। केचन तरङ्गैः सह क्रीडन्ति। अपरे तरङ्गैः साकं समुच्छलन्ति। अत्र अनेकाः नौकाः अपि सन्ति। धीवरैः सह पर्यटकाः नौकाभिः समुद्रविहारं कुर्वन्ति।

केचन जनाः प्रातः समुद्रं गच्छन्ति। तत्र साधवः मुनयः च स्नान्ति। भक्ताः देवालयं गच्छन्ति। तत्र ते देवेभ्यः देवीभ्यः च पुष्पाणि अर्पयन्ति प्रार्थयन्ति च-



**नमो देवेभ्यः सर्वेभ्यः**
**पालकेभ्यो नमो नमः।**
**अखिलाभ्यः पवित्राभ्यः**
**देवीभ्यश्च नमो नमः।।**

ततः परं पूजकः सर्वेभ्यः प्रसादं यच्छति, उपदिशति च-

**श्रोत्रं श्रुतेनैव न कुण्डलेन**
**दानेन पाणिर्न तु कङ्कणेन।**
**विभाति कायः करुणापराणां**
**परोपकारैर्न तु चन्दनेन॥**



ततः जनाः द्विचक्रिकया, यानेन, पादाभ्यां वा स्व स्व गृहं प्रति गच्छन्ति।

## शब्दार्थाः



| | | |
|---|---|---|
| **बालुकाभिः** | – | रेतों से |
| **रचयति** | – | बनाता है/बनाती है |
| **पादेन** | – | (एक) पैर से |
| **क्षिपन्ति** | – | फेंकते हैं/फेंकती हैं |
| **केचन** (अव्यय) | – | कुछ |
| **तरङ्गैः** | – | लहरों से |
| **अपरे** | – | दूसरे |
| **साकम्** (अव्यय) | – | साथ |
| **समुच्छलन्ति** | – | उछलते हैं/उछलती हैं |
| **अनेकाः** | – | बहुत सी |
| **धीवरैः** | – | मल्लाहों के साथ |
| **पर्यटकाः** | – | (अनेक) पर्यटक/सैलानी |

| | | |
|---|---|---|
| **स्नान्ति** | – | नहाते हैं/नहाती हैं |
| **अर्पयन्ति** | – | चढ़ाते हैं/चढाती हैं |
| **अखिलाभ्यः पवित्राभ्यः** | – | समस्त पवित्र |
| **देवीभ्यः** | – | देवियों को |
| **ततः परं** | – | उसके बाद |
| **पूजकः** | – | पूजारी |
| **यच्छति** | – | देता है/देती है |
| **उपदिशति** | – | उपदेश देता है/देती है |
| **श्रोत्रम्** | – | कान |
| **श्रुतेनैव** (श्रुतेन+एव) | – | सुनने से ही/शास्त्रों को सुनने से |
| **पाणिः** | – | हाथ |
| **कङ्कणेन** | – | कंगन से |
| **विभाति** | – | शोभा पाता है/पाती है |
| **कायः** | – | शरीर |
| **करुणापराणाम्** | – | दया से भरे हुए का/भरी हुई की |
| **परोपकारैः** (पर+उपकारैः) | – | दूसरों के उपकारों से |
| **द्विचक्रिकया** | – | साइकिल से |
| **पादाभ्याम्** | – | दोनों पैरों से |

## अभ्यासः



### 1. मौखिकम् उच्चारणं कुरुत–

| | | | |
|---|---|---|---|
| (क) | देवाय | देवाभ्याम् | देवेभ्यः |
| | ईश्वराय | ईश्वराभ्याम् | ईश्वरेभ्यः |
| | बालाय | बालाभ्याम् | बालेभ्यः |
| | फलाय | फलाभ्याम् | फलेभ्यः |

| | | | |
|---|---|---|---|
| (ख) | नौकया | नौकाभ्याम् | नौकाभिः |
| | द्विचक्रिकया | द्विचक्रिकाभ्याम् | द्विचक्रिकाभिः |
| | चटकया | चटकाभ्याम् | चटकाभिः |
| | बालुकया | बालुकाभ्याम् | बालुकाभिः |
| (ग) | पादेन | पादाभ्याम् | पादैः |
| | कमलेन | कमलाभ्याम् | कमलैः |
| | देवेन | देवाभ्याम् | देवैः |
| | पुष्पेण | पुष्पाभ्याम् | पुष्पैः |
| (घ) | शिक्षिकायै | शिक्षिकाभ्याम् | शिक्षिकाभ्यः |
| | लतायै | लताभ्याम् | लताभ्यः |
| | मालायै | मालाभ्याम् | मालाभ्यः |
| | नौकायै | नौकाभ्याम् | नौकाभ्यः |

## 2. यथायोग्यं योजयत-

| | |
|---|---|
| दीपकः | पोषणाय |
| क्रीडनकम् | दानाय |
| धनम् | प्रकाशाय |
| परोपकारः | खेलनाय |
| दुग्धम् | पुण्याय |

## 3. चतुर्थी-विभक्तिप्रयोगेण वाक्यानि पूरयत-

**यथा-** परोपकारः **पुण्याय** भवति। (पुण्य)

(क) .................... नमः। (शिक्षक)

(ख) सुरेशः .................... पुस्तकं यच्छति। (मित्र)

(ग) सज्जनाः .................... जीवन्ति। (परोपकार)

(घ) माता .................... अन्नं ददाति। (भिक्षुक)

(ङ) परपीडनम् .................... भवति। (पाप)

## 4. तृतीया-विभक्तिप्रयोगेण वाक्यानि पूरयत-

यथा- पीयूषः **मित्रेण** सह गच्छति। (मित्र)

(क) बालिकाः .................... सह पठन्ति। (बालक)

(ख) तडागः .................... विभाति। (कमल)

(ग) अहमपि .................... खेलामि। (कन्दुक)

(घ) अश्वाः .................... सह धावन्ति। (अश्व)

(ङ) मृगाः .................... सह चरन्ति। (मृग)

## 5. उत्तरेषु रिक्तस्थानानि पूरयत-

(क) बालकाः केन कन्दुकं क्षिपन्ति?

उत्तरम् - बालकाः .................... कन्दुकं क्षिपन्ति।

(ख) अपरे कैः साकं समुच्छलन्ति?

उत्तरम् - अपरे .................... साकं समुच्छलन्ति।

(ग) पर्यटकाः काभिः समुद्रविहारं कुर्वन्ति?

उत्तरम् - पर्यटकाः .................... समुद्रविहारं कुर्वन्ति।

(घ) कस्मै नमः?

उत्तरम् – ………………… नमः।

(ङ) भक्ताः केभ्यः पुष्पाणि अर्पयन्ति?

उत्तरम् – भक्ताः ………………… पुष्पाणि अर्पयन्ति।

(च) काभ्यः नमो नमः?

उत्तरम् – ………………… नमो नमः।

## 6. कोष्ठकात् उचितपदप्रयोगेण रिक्तस्थानानि पूरयत–

(क) सीता ……………… सह वनं गच्छति। (रामः/रामेण)

(ख) धनिकः ……………… धनं ददाति। (निर्धनम्/निर्धनाय)

(ग) बालः ……………… सह विद्यालयं गच्छति (जनकेन/जनकाय)

(घ) अहं ……………… क्रीडाक्षेत्रं गच्छामि। (द्विचक्रिकायाः/द्विचक्रिकया)

(ङ) प्रधानाचार्यः ……………… पारितोषिकं ददाति। (छात्राणाम्/छात्रेभ्यः)

## 7. निर्देशानुसारं परिवर्तयत–

| | | | | |
|---|---|---|---|---|
| **यथा–** | देवेभ्यः | – | (स्त्रीलिङ्गे) | देवीभ्यः |
| | छात्रायै | – | (पुँल्लिङ्गे) | ………………… |
| | तरङ्गेण | – | (बहुवचने) | ………………… |
| | ईश्वरेभ्यः | – | (एकवचने) | ………………… |
| | कन्दुकेन | – | (द्विवचने) | ………………… |
| | नायकेभ्यः | – | (स्त्रीलिङ्गे) | ………………… |

ध्यातव्यम्-

## शरीराङ्गानां परिचयः

